# Shri Swaminatha Shatkam

# श्रीस्वामिनाथषट्कम्

## Document Information

Text title : Svaminatha Shatkam

File name : svAminAthaShaTkam.itx

Category : subrahmanya, ShaTkam

Location : doc_subrahmanya

Author : Anantarama Dikshita

Transliterated by : Malathi Ravi Kuduvaa

Proofread by : Malathi Ravi Kuduvaa

Latest update : January 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2021

*sanskritdocuments.org*

# श्रीस्वामिनाथषट्कम्

हे स्वामिनाथार्तबन्धो ।
भस्मलिप्ताङ्ग गाङ्गेय कारुण्यसिन्धो ॥ १॥

रुद्राक्षधारिन्नमस्ते रौद्ररोगं हर त्वं पुरारेर्गुरोर्मे ।
राकेन्दुवक्त्रं भवन्तं माररूपं कुमारं भजे कामपूरम् ॥ २॥

मां पाहि रोगादघोरात् मङ्गलापाङ्गपातेन भङ्गात्स्वराणाम् ।
कालाच्च दुष्पाककूलात् कालकालस्य सूनुं भजे क्रान्तसानुम् ॥ ३॥

ब्रह्मादयो यस्य शिष्याः ब्रह्मपुत्रा गिरौ यस्य सोपानभूताः ।
सैन्यं सुराश्चापि सर्वे सामवेदादिगेयं भजे कार्तिकेयम् ॥ ४॥

काषाय संवीतगात्रं कामरोगादि संहारिभिक्षान्न पात्रम् ।
कारुण्यसम्पूर्णनेत्रं शक्तिहस्तं पवित्रं भजे शम्भुपुत्रम् ॥ ५॥

श्रीस्वामिशैले वसन्तं साधुसङ्घस्य रोगान् सदा संहरन्तम् ।
ओङ्कारतत्त्वं वदन्तं शम्भुकर्णे हसन्तं भजेऽहं शिशुं तम् ॥ ६॥

स्तोत्रं कृतं चित्रचित्रं दीक्षितानन्तरामेण सर्वार्थसिद्ध्यै ।
भक्त्या पठेत् यः प्रभाते देवदेवप्रसादात् लभेताष्टसिद्धिम् ॥

इति श्रीस्वामिनाथषट्कं सम्पूर्णम् ।

Encoded and proofread by Malathi Ravi Kuduvaa

Please send corrections to *sanskrit@cheerful.com*